This Question Paper consists of 42 questions and 11 printed pages.
अस्मिन् प्रश्नपत्रे 42 प्रश्नाः एवं 11 मुद्रित पृष्ठाः सन्ति।

**Code No. 59/S/O/S**
कोड नं०

Roll No.
अनुक्रमाङ्कः

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

**Set / सेट** A

# SANSKRIT
# संस्कृतम्
# (209)

Day and Date of Examination ........................................................................
(परीक्षादिवसः दिनाङ्कश्च)

Signature of Invigilators 1. ........................................................................
(निरीक्षयोः हस्ताक्षरम्)

2. ........................................................................

***सामान्या अनुदेशाः —***

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारमेव सन्ति।
3. वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु कोऽपि एकम् उत्तरं चित्वा पृथक्रूपेण प्रदत्ते उत्तरपुस्तिकामध्ये लिखेत्।
4. वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि।
5. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।
6. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट (कोड) संख्या 59/S/O/S सेट A अवश्यं लेखनीया।

# SANSKRIT
## संस्कृतम्
## (209)

समयः — होरात्रयम् ] [ पूर्णाङ्काः — 100

**निर्देशाः** — (i) अस्मिन् प्रश्नपत्रे **द्विचत्वारिंशत्** प्रश्नाः सन्ति।

(ii) प्रत्येकं प्रश्नस्य समक्षम् अङ्काः सूचिताः।

(iii) **सर्वे** प्रश्नाः अनिवार्याः।

### खण्ड—क

**1.** शुश्रूषुः गुरुगतां—अधिगच्छति। 1

(A) विद्याम् (B) श्रियम्

(C) वाणीम् (D) बुद्धिम्

**2.** परार्थाय फलानि के यच्छन्ति? 1

(A) वृक्षाः (B) सज्जनाः

(C) साधवः (D) दानिनः

**3.** निषादराजः कः आसीत्? 1

(A) सुग्रीवः (B) हनुमान्

(C) दशरथः (D) गुहः

**4.** बहवः रोगाः केन नश्यन्ति? 1

(A) स्नानेन (B) अभ्यंगेन

(C) भोजनेन (D) उपवासेन

**5.** जले किं न उत्सृजेत्? 1

(A) पुरीषं (B) पुष्पम्

(C) दीपम् (D) तैलम्

**6.** बोपदेवः शिलाखंडे किम् अपश्यत्? 1

(A) पात्रम् (B) जलम्

(C) गर्तम् (D) मार्गम्

**7.** सा <u>का</u> आसीत् इत्यत्र 'का' इति पदे मूलशब्दः कः? 1

(A) क (B) किम्

(C) को (D) आ

**8.** प्रभुवर्यस्य आदेशं कः पालयति? 1

(A) शिववीरः (B) संन्यासी

(C) गौरसिंहः (D) दौवारिकः

**9.** दौवारिकाय उत्कोचं <u>दातुम्</u> इच्छति। अत्र 'दातुम्' इति पदे कः प्रत्ययः? 1

(A) तुम्
(B) तम्
(C) तुमुन्
(D) तमुन्

**10.** <u>लवस्य</u> पराक्रमेण कस्य सैनिकाः प्रतिनिवर्तन्ते? इत्यत्र 'लवस्य' इति पदे का विभक्तिः? 1

(A) द्वितीया
(B) षष्ठी
(C) पञ्चमी
(D) तृतीया

**11.** साधोः असाधोश्च लक्षणं लिखत। 1+1=2

**12.** (क) बोपदेवः किमर्थं विद्यालयात् बहिः निरगच्छत्? 1

(ख) बोपदेवः बालानां सुखबोधाय किम् अरचयत्? 1

**13.** (क) अयोध्या नगरी कस्याः नद्यास्तीरे वर्तते? 1

(ख) कबंधनामकः राक्षसः कीदृशः आसीत्? 1

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत—

चन्द्रकेतुः : भो भो राजानः! असंख्यातैः द्विरद-तुरग-स्यंदनस्थैः भवद्भिः कवचावृतैः एकस्मिन् पदातौ युगपत् यत् युद्धं प्रारब्धं तद् वः धिग् अस्मान् च धिक्।

लवः : (सोन्माथम्) आः कथम् अनुकम्पते नाम? (ससंभ्रमं विचिन्त्य) भवतु जृम्भकास्त्रेण तावत् सैन्यानि संस्तम्भयामि। (इति नाट्येन मुंचति)

सुमन्त्रः : अये! किमिदानीं सैन्यघोषाः प्रशान्ताः। वत्स, मन्ये कुमारेण जृम्भकास्त्रं प्रयुक्तमिति।

चन्द्रकेतुः : अत्र कः सन्देहः। पश्यतु सैन्यं चित्रलिखितमिव अस्पन्दम् आस्ते। अतोऽजितवीर्यं जृम्भकास्त्रमेवेदम्।

**प्रश्नाः**

(क) लवः किम् अस्त्रं मुञ्चति?

(ख) जृम्भकास्त्रेण सैन्यं कीदृशं जातम्?

(ग) लवः जृम्भकास्त्रं कुतः प्राप्तवान्? 1×3=3

**15.** अधोलिखितयोरेक**कस्य** चरित्रचित्रणं पंचवाक्येषु संस्कृतेन कुरुत— 1×5=5

कण्वः ; लवः।

**16.** प्रश्नान् उत्तरत— 1+1=2

(क) 'किमिच्छन्ति नराः काश्याम्' इत्यस्य किमुत्तरम्?

(ख) 'भूपानां रणे कः हितः?

**17.** (क) अनन्तकः व्याधिः कः? 1+1=2

(ख) भ्राता कं प्रति द्वेषं न कुर्यात्?

**18.** हिताशी स्यान्मिताशी स्यात् कालभोजी जितेन्द्रियः। 1+1=2
पश्यन् रोगान् बहून् कष्टान् बुद्धिमान् विषमाशनात्॥

(क) यः हितकरं भोजनं करोति सः किं कथ्यते?

(ख) विषमभोजनात् किं भवति?

**19.** ''एषा सा दृश्यते सीते, राजधानी पितुर्मम।'' 1+1=2

(क) कः कं प्रति कथयति?

(ख) राजधान्याः नाम किमासीत्?

**20.** अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत—

देवागारे पिहितद्वारे तमोवृत्तेऽस्मिन् भजसे कम्?

त्यज जपमालां त्यज तव गानं नास्त्यत्रेशः स्फुटय दृशम्॥

(क) कविः किं त्यक्तुं कथयति?

(ख) ईशः कुत्र नास्ति?

(ग) कविः अन्ते किं कथयति? 1×3=3

**21.** अधोलिखितश्लोकस्य अन्वये रिक्तस्थानपूर्तिं कुरुत— 1×3=3

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।

दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्॥

यत्तु प्रत्युपकारार्थं ___(i)___ फलम् उद्दिश्य वा परिक्लिष्टम् ___(ii)___ दीयते तद्दानं ___(iii)___ स्मृतम्।

**22.** रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत— 1+1=2

(क) अशक्तैः बलिनः शत्रोः कर्त्तव्यं प्रपलायनम्।

(ख) पादपाः अपि जिघ्रन्ति।

**23.** रिक्तस्थान-पूर्तिं कुरुत— 1+1=2

(क) समानी व ______ समाना हृदयानि वः।

(ख) तेन ______ भुञ्जीथाः।

**24.** एकपदेन उत्तरं लिखत— 1+1=2

(क) आर्यभटः केषां गतिविषयकं महत्त्वपूर्णं ज्ञानं दत्तवान्?

(ख) सर्वबलेभ्यः अपि किम् अतिरिच्यते?

**25.** अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत— 1×3=3

ध्यायन् क्लेशान् स्वबन्धूनां तद्धितैक परायणः।
विराजते मुनिर्बुद्धो बोधिद्रुमतले यथा॥

(क) अस्मिन् श्लोके कस्य महिमा वर्णिता?

(ख) बोधिद्रुमतले कः विराजते स्म?

(ग) 'विराजते' इत्यत्र कः उपसर्गः?

**26.** अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत— 1×3=3

भोजनान्ते पिबेत् तक्रं वासरान्ते पिबेत् पयः।
निशान्ते च पिबेद् वारि त्रिभी रोगो न जायते॥

(क) तक्रं कदा पिबेत्?

(ख) निशान्ते किं पिबेत्?

(ग) पयः कदा पिबेत्?

**27.** कस्यचि**देकस्य** पाठस्य सारांशं पंचवाक्येषु संस्कृतेन लिखत— 1×5=5

(क) यद्‌भविष्यो विनश्यति

(ख) त्याज्यं न धैर्यम्

## खण्ड—ख

### ( अनुप्रयुक्तव्याकरणम् )

**28.** अधोलिखितानां वर्णानाम् उच्चारणस्थानानि लिखत— ½×4=2

ग ; ढ ; ल ; फ ।

**29.** रेखांकितपदेषु संधिच्छेदं कृत्वा संधिनाम लिखत— 1×3=3

यत्तु <u>प्रत्युपकारार्थम्</u>। क्षमा च का परा <u>प्रोक्ता</u>।
मनः शीघ्रतरं <u>वाताचिन्ता</u>।

**30.** संधि कुरुत— 1+1=2

शिवगणाः + तादृशाः। आतुरस्य भिषक् + मित्रम्।

**31.** रेखांकितपदेषु कः मूलशब्दः का च विभक्तिः? 1×2=2

(क) मित्रस्याहं <u>चक्षुषा</u>।

(ख) सत्यमूलानि <u>सर्वाणि</u>।

**32.** रिक्तस्थाने अंकानां स्थाने संख्यावाचकपदानि लिखत— 1+1=2

(क) तस्मिन् आश्रमे ___1___ पर्णशाला अस्ति।

(ख) तत्र ___2___ नद्योः संगमः भवति।

**33.** रेखांकितपदयोः कः मूलधातुः कश्च लकारः? 1+1=2

(क) सः पंचवटीं <u>गच्छति</u>।

(ख) अहमपि कुशाग्रबुद्धिः <u>भविष्यामि</u>।

**34.** रेखांकितशब्दयोः उपसर्ग-प्रत्ययौ चित्वा पृथक् लिखत— 1+1=2

(क) सः ग्रन्थान् <u>प्रणीतवान्</u>।

(ख) चित्रकूटः <u>प्रकाशते</u>।

**35.** अधोलिखितयोः समस्तपदयोः विग्रहं लिखत— 1+1=2

पक्षिराजः ; स्वच्छवस्त्रम्।

**36.** अधोलिखितविग्रहाणां कृते समस्तपदं लिखत— 1+1=2

अविद्यमानानि पदानि यस्य सः। भोजनस्य अन्ते।

**37.** अधोलिखितवाक्येषु रिक्तस्थानानि, कोष्ठान्तर्गत-प्रकृतिप्रत्ययं संयोज्य, पूरयत— 1×3=3

(क) बालः चित्रं ______ पठति। (दृश् + क्त्वा)

(ख) मकरः वानरं ______ इच्छति स्म। (हन् + तुमुन्)

(ग) ग्रामे एका ______ वहति। (नद + ङीप्)

**38.** कोष्ठगतशब्दस्य उपयुक्तरूपेण रिक्तस्थानानि पूरयत— 1×3=3

(क) ______ परितः वृक्षाः सन्ति। (विद्यालय)

(ख) राजा ______ धनं यच्छति। (निर्धन)

(ग) ______ पठनं रोचते। (छात्र)

## खण्ड—ग

### ( रचनाकौशलम् )

**39.** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत— 1×5=5

हिमालयो नाम पर्वतः भारतदेशस्य उत्तरस्यां दिशि वर्तते। अस्य शिखराणि सदैव हिमाच्छादितानि भवन्ति। अतएव सः हिमस्य आलयः अर्थात् हिमालयः कथ्यते। सः विश्वस्य समस्तेषु पर्वतेषु उच्चतमः। अतएव नगाधिराजः इत्यपि ज्ञायते।

अयं पर्वतः शिवस्य क्रीडास्थली पार्वत्याश्च उत्पत्तिस्थलमपि अस्ति। कालिदासेन हिमालयस्य बहुशः प्रशंसा कृता। हिमालयस्य शृंगानि दुर्लंघ्यानि उत्तरदिशायां स्थितः हिमालयः भारतस्य प्रहरी इव विद्यते। अयं पर्वतः भारतदेशस्य मणिमुकुट इव विद्यते।

**प्रश्नाः**

(क) हिमालयः कस्यां दिशि स्थितः?

(ख) के हिमाच्छादितानि भवन्ति?

(ग) हिमालयस्य अपरं नाम किमस्ति?

(घ) एष कस्य क्रीडास्थली?

(ङ) 'शृंगानि दुर्लंघ्यानि' इत्यत्र विशेष्य विशेषणपदं किम्?

**40.** अधोलिखितविषयमधिकृत्य मञ्जूषापदसहायतया एकम् अनुच्छेदं लिखत— 1×5=5

'परोपकारः'

| मञ्जूषा |
|---|
| परेषाम्, उपकारः, कथ्यते, स्वार्थं, परित्यज्य, परेषां हिताय यत् क्रियते—परोपकारः पुण्याय, परार्थे, जीवनं सफलम्, प्रकृतौ, पशुषु अपि परोपकारः |

**41.** भवान् प्रदीपः, शिक्षकदिवसावसरे स्वशिक्षकं सादरं शुभकामनाः प्रदातुं मंजूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा पत्रमेकं लिखतु— 1×5=5

नागपुरतः

तिथि : ................

श्रद्धेयाः गुरुवर्याः,

सादरं ______,

अद्य ______ भवन्तं प्रति सादरं ______ प्रेषयामि मम जीवने यः कोऽपि ______ वर्तते तद् भवतां शिक्षया मार्गदर्शनेन एव संजातः। भवतामाशीर्वादः ममोपरि ______ भवेत्।

भवतां शिष्यः

प्रदीपः

| मञ्जूषा |
|---|
| शिक्षकदिवसे, प्रणमामि, शुभकामनाः, सर्वदा, संस्कारः |

**42.** अधोलिखितं चित्रं दृष्ट्वा मंजूषापदसहायतया पञ्च वाक्यानि संस्कृतेन लिखत— 1×5=5



| मञ्जूषा |
|---|
| वृक्षाणां, पुष्पपादपानां, रोपणं, विद्यालयस्य नवीने, भवने, छात्रैः शिक्षकैः च महता समारोहेण, समूहे-कृतम् |

★ ★ ★